ततश्च रङ्गमध्ये च विचित्राश्च गतीस्तथा ।
करणान्यपि सर्वाणि विषमाणि भुजानि च ॥

गीतवाद्यानुगमनं लास्याङ्गाचरणं तथा ।
एवमन्यानि सर्वाणि नित्यमभ्यासतो नयेत् ॥

Colophon: Nil.

Subject: Nāṭyavedāgama, Nṛttaprakaraṇa.

Remarks:—The Ms. is in good condition.
Nāṭyavedāgama is a work by Tulajārāja on Nāṭyaśāstra.
This Ms. represents only the third chapter of the work.

॥ नृत्तरत्नावली ॥

10672. NṚTTARATNĀVALĪ.

Burnell's Catalogue No. 11540. Page 61. Left column.
Substance—Palm leaf. Size—$15\frac{3}{4} \times 1\frac{3}{8}$ inches. Leaves—100. Lines—4 to a Page. Script—Telugu. No. of Granthas—1900. Author—Jāyasenāpati. Complete. Not printed.

Beginning

नृत्तरत्नावली ॥

मौलिस्वेदजलार्द्रकुन्तलपुरः पूर्वाधिकोष्ठस्तनं
श्रोणीमुच्छ्वसदङ्ककाम्बलाकिते(?) पार्श्वे प्रकम्पौ करौ ।
सस्तम्भञ्चरणद्वयञ्चदुदितो गौर्याः शिवः....
कोकौत्तचनृत्तकलोचिताङ्गकथनव्याजैः स्पृशत्पातु वः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वामेभावाभिनयसुषमालङ्कृतां लास्यमङ्गी-
मर्धेन्यस्मिन्नुदितडमरुं बिभ्रतस्ताण्डवञ्च ।
स्वस्वक्षेत्रन्यवहृतकलालोकदत्तावधानाः
शंभोः कान्ताकलितवपुषो दृष्टयः पान्तु युष्मान् ॥

* *

अभ्यासाद्भरतोक्तिभङ्गिषु बहुव्याख्यात्वदेषु श्रमात्
संवादाद्गुरुसम्प्रदायसुहृदां शम्भोः प्रसादादपि ।
ज्ञात्वा शास्त्ररहांसि निर्मितमिदं व्यक्तं महार्थान्वितं
न स्यात्तस्यहिताय शाश्वतयशः संलक्षणं लक्षणम् ॥

प्रेष्यप्रज्ञामतिशयवतींस्वामिभक्तञ्चहर्षा
दाकौमाराद्गणपतिनृपोज्ञायनं यं समर्थ्य ।
कुण्डामात्येसकलसुमनः सेव्यमानोजयन्तं
वाचांपत्यौहरिरिवकलाश्लाघनीयां व्यनैषीत् ॥

जित्वा शौर्येण पृथ्वीं जलनिधिरशनां स्वःस्थिरीकृत्यलोकं
सङ्गीतस्योपभोगं सकुतुकमनसः स्वामिनः शासनेन ।
तस्याभीष्टस्यभास्वन्मणिमुकुरनिभं नृत्तलीलायितस्य
राज्ञोऽसौ शास्त्रमेतद्रचयति चतुरं नृत्तरत्नावलीति ॥

कवीनां सरसंक...नृत्तकलाविदाम् ।
नृत्तरत्नावलीराज्ञांचित्तकैरवकौमुदी ॥

आगत्य ब्रह्मलोकादिह भरतमुनिः शास्त्रमेतन्मदीयं
दृष्ट्वाभूयः कृतादौप्रसृमरपुलकव्यञ्जितान्तः प्रमोदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐश्वर्यपश्यदेतत्कथमिति(माधि)गतवानाश्चर्यं मे समग्रं
सश्रीमाज्ञायसेन...किनियतं वक्ष्यताग्रेमुनीनाम् ॥

ममवानर्तकीनूनं वर्णगाङ्गैर्मनोहरैः ।
करोमिशास्त्ररङ्गेऽस्मिन्वक्ष्येनृत्तमतिस्फुटम् ॥

त्यागोद्वाहमहाभिषेकनगरविश्मप्रवेशोदक-
क्रीडासु प्रियसंगमव्रतमहादानात्मजोत्पत्तिषु ।
यात्रापर्वपरीक्षणोत्सवजयानन्दप्रतिष्ठाहित
प्राप्तिष्वभ्युदयायनृत्तमुचितं स्याद्देवपूर्वादिषु ॥

पूर्वाङ्गेषु प्रयोज्यत्वान्नृत्तं नाट्योपकारकम् ।
ततो नाट्यस्यवक्ष्यमिसंक्षेपादिहलक्षणम् ॥

वैवस्वतेऽन्तरेह्यस्मिन् पुरा त्रेतायुगे किल ।
लोकेऽस्मिन्नरिषड्वर्गनिम्नेदुःखितदुःखिते ॥

पुरन्दरमुखादेवाः पप्रच्छुःकमलासनम् ।
दृश्यं सर्वञ्च सर्वेषामिच्छामिक्रीडनीयकम् ॥

इति विज्ञापितो देवैर्भावयन्सर्ववर्णिकम् ।
वेदेभ्यः सारमादायनाट्यवेदं ससर्ज सः ॥

End :

स्तौमिसम्भावनाधन्यमन्यां[मन्यां] लक्ष्मीहरालसाम् ।
अपि स्वपरदेशीयान्नानाविधकलानिधीन् ॥

प्रातस्तुनिवाचालां(?) नाद्यां विद्यावतोऽखिलान् ।
परमण्डलिनोशेषान्कवीन्कीर्तिविधायिनः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अ...पि यथाकामं सुवर्णाभरणाम्बरैः ।
कृतार्थान्पार्थिवः कुर्याद्विरोधेन सुकीर्तिलम्पटान् (?) ॥

सूचीमुखगतिस्यूतगुणाशिखरशोधिना ।
जायसेनाधिनाथेननृत्तरत्नावली कृता ॥

Colophon :

इति श्रीमन्महाराजाधिराज गणपतिदेवजन्मसाधनिकजायसेनापति-
विरचितायां नृत्तरत्नावल्यामष्टमोऽध्यायः ।
समाप्ता नृत्तरत्नावली ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
यादृशं + न विद्यते ॥ श्री गुरुभ्यो नमः ।

Subject: Nṛttaratnāvalī.

Remarks:—The Ms. is in good condition.

The author according to the colophon seems to be Jāyasenāpati and not Gaṇapati Devasena as is mentiored in the Ānandāśrama bibliography. He was one of the generals under Ganapati of Kākati Family who ruled in Warangal and so should have flourished in A. D. 13th century.

NṚTTARATNĀVALĪ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10673	B. L. 11541	Pl.	Gr.	Complete.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

DETAILED REMARKS
on the
ABOVE MSS.

10673 On the title page is given
वीरराघवदीक्षितुल भेटि आनन्दरावु गुजार्ति ।

॥ नृत्यनिरूपणम् ॥

10674. NṚTYANIRŪPAṆAM.

Burnell's Catalogue No. 6616. Page 59. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—312. Author—? Incomplete. Not printed.

Beginning:

गण्डद्वन्द्वगलन्मदाम्बुनिरतं भृङ्गावलीचञ्चलं
कर्णान्दोलनतो विधायपरितो डाङ्कारकोलाहलाम् ।
वामाङ्कस्थितसिद्धिकञ्चुकबहिःस्फारप्रभोच्चस्तन-
द्वन्द्वाग्रं भ्रमरभ्रमात्स्पृशति तं नागाननं मन्महे ॥

प्रमेयरचनाचमत्कृतिरुपैतिचित्ते यदा
लसद्गुणविशारदावन...पङ्कजेशारदा ।
उदेति पदचातुरीरचनया बुधानन्ददा
लसद्गुरुपदाम्बुजभ्रमरवेदसूरेस्तव ॥ २ ॥

जयति तिमिरभानुर्दुःखदुर्गोरुभानुः
मदमुदितगजास्यःस्वीकृतानेकलास्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गगनविहितशुण्डादण्डपानीयबिन्दु-

प्रकरविजिततारो नृत्यभूमावुदारः ॥ ३ ॥

प्रणम्य श्रीगुरुं सिद्धं सिद्धवन्द्यपदाम्बुजम् ।

मतङ्गभरतादीनां मतान्यालोच्य सद्गुरोः ॥

सोढलात्मजसङ्गीतं तथा दामोदरस्य च ।

दर्पणं वीक्ष्य नृत्यादौ पुष्पाञ्जलिविधिं ब्रुवे ॥

दामोदरश्चतुर इत्यभिधाप्रसिद्धः

सङ्गीतसिन्धुतरणीकरणप्रवीणः ।

तस्यात्मजोऽभवदनन्तसमाह्वयोऽसौ

वेदं मुदा तमपि पाठयदात्मसिद्ध्यै ॥

संशब्दात्स्वररागरङ्गरचनासंगीतशास्त्रादिता

गावर्णाद्यतयो वदान्तिविबुधा नृत्यप्रसिद्धास्तुयः ।

तेन स्याच्च ततावनद्धसुखिर(?)श्लक्ष्णालकास्योद्भवं

संङ्गीतंगदितं बुधैस्त्रयमतः श्रीशार्ङ्गदेवादिभिः ॥

तथा च संमतिः ।

...शशिनः कलाश्चेत्

स्याद्यत्कलानां गणना कदाचित् ।

तदाज्ञया वेदबुधश्चकार

सङ्गीतपूर्वं मकरन्दसंज्ञकम् ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End:

अथासां लक्षणानि ।

द्विर्दशस्थानके एवं चतुरस्रादयः कराः ।

पल्लवान्तानि गदितास्ते कथ्यन्ते क्रमादिह ॥ ३७ ॥

देहः स्वाभाविकांगुष्ठौ पादयोश्चेन्मिथोयुतौ ।

गुल्फौ च संहतौ तत्स्यात् पुष्पाञ्जलिविधावपि ॥ ३८ ॥

इतिसंहतम् ।

पुरोमुखौ समस्कन्धकर्पूरौ घटकामुखौ ।

स्थितौ वक्षःपुरोदेशे वक्षसोऽष्टांगुलान्तरे ॥ ३९ ॥

चतुरस्राविति प्रोक्तौ स्रगाद्याकर्षणे करौ ।

Colophon: Nil.

Subject: Nṛtyanirūpaṇa.

Remarks—The Ms. is in a decaying condition. This appears to be a portion of Veda's Saṅgītamakaranda.

॥ नर्तनानिर्णयः ॥

10675. NARTANANIRṆAYAH.

Burnell's Catalogue No. 6602. Page 60. Right column. Substance—Paper. Size—$4\frac{1}{4} \times 6\frac{1}{4}$ inches. Sheets—96 (1 & 17-109). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Puṇḍarīka-Viṭṭhala. Incomplete. Not printed.

Beginning:

....सूक्ष्मः पुष्टावतिपुष्टश्च कृत्रिमः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चाख्या इतिधत्तेऽसौ चतुर्धा व्यवहारतः ।
अनुमन्द्रोनाभिदेशेमन्द्रो हृदिगले पुनः ॥
मध्यस्तारस्तु मूर्ध्निस्याद्द्विगुणाश्चोत्तरोत्तराः ।
यन्त्रेनुयन्त्रस्थानं स्याद्गायके तदशक्यतः ॥ ७ ॥

End

नर्तनं लक्ष्म लक्ष्यज्ञो योनर्तयति नर्तकः ।
अङ्गविक्षेपविश्लेष्यं जनचित्तानुरञ्जनम् ॥
नटेन दर्शितं यत्र नर्तनं कथ्यते तदा ।
नाट्यं नृत्यं नृत्तमिति त्रिविधं तत्प्रकीर्तितम् ॥
नाटकोक्तकथादेश वृत्तिभावर........... ॥

Colophon : (Leaf No.)

इति श्रीकर्णाटजातीयपुण्डरीकविठ्ठलविरचिते नर्तननिर्णये गायन-
प्रकरणं तृतीयम् ।

Subject: Nartananirṇaya.

Remarks:—The Ms. is in a fairly good condition.

The author of this work wrote many works on singing. So far three of them are published.

1 Rāgamañjarī
2 Rāgamālā
3 Ṣaḍrāgacandrodaya

Besides the above the Mss. in this library contain three of his works.

1 Saṅgītavṛttaratnākara
2 Nartananirṇaya
3 Viṭṭhalīya

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is the second of the above and the next two Mss. are 1 & 3.

The Ānandāśrama bibliographly mentions this and the three printed works as those of Puṇḍarīkaviṭṭhala but gives the name of the author of (1) as simple Viṭṭhala which suggests that he is different from this author. The third work is mentioned nowhere.

This author was a contemporary of Rāja Mansingh the famous minister of Akbar and so flourished in the 16th century A. D.

॥ सङ्गीतवृत्तरत्नाकरः ॥

1066. SAṄGĪTAVṚTTARATNĀKARAḤ.

Burnell's Catalogue No. 6657. Page 60. Right column. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{7}{8}$ inches. Sheets—17. Lines—8 to a Page, Script—Devanāgarī. No. of Granthas—300. Author—Viṭṭhala. Incomplete. Not printed.

Beginning:

पताकस्त्रिपताकोर्धपताकः कर्तरीमुखः ।
मयूराख्योर्धचंद्रश्चाप्यरालश्शुकतुंडकः ॥

End:

अभिनेयवशादेषां संयुतत्वमपेक्ष्यते ।
मार्गप्रदर्शनं तेषां कुर्मोलक्ष्मानुसारतः ॥

Colophon:

इति रागकदम्बः

Subject: Saṅgītavṛttaratnākara.

Remarks:—The Ms. is in a fairly good condition.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ विट्ठलीयः ॥

10677. VIṬṬHALĪYAḤ.

Burnell's Catalogue No. 6656. Page 60. Right column. Substance—Paper Size—$6\frac{1}{2} \times 4\frac{3}{4}$ inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Viṭṭhala. Incomplete. Not printed.

Beginning:

मनोयुंक्ते विवक्ष्वात्माइंतिवह्निम....नलः ।
प्रेरयत्यनिलंप्राणानिलश्चोर्ध्वं क्रमचरन् ॥

End:

ह्रस्वैस्स्वरैस्सन्निकर्षोद्विद्विरुक्तैर्नरंतरैः ॥

Colophon:

इति छायिगतालङ्काराः

Subject: Viṭṭhalīya.

Remarks:—The Ms. is in fairly good condition.

॥ भरतलक्षणम् ॥

10678. BHARATALAKṢAṆAM.

Burnell's Catalogue No. 6624. Page 61. Left column. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{2}$ inches. Sheets—18. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—? Incomplete. Not printed.

Beginning

श्री गणेशाय नमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् ।
आहार्यं चन्द्रतारादितन्नुमः सात्विकं शिवम् ॥ १ ॥

वागीशो भरताय नाट्यनिगमं संदिष्टवान्प्रेमतो
गन्धर्वैः सममीश्वरस्य पुरतो नाट्यं ततानाशु सः ।
स्मृत्वा तण्डुमजिघ्रहत्तदखिलं शम्भुर्मुनिस्यः पुनः
सन्दिष्टं भरताय तेन भुवने प्रख्यापितं तैरिदम् ॥

End:

शकटश्शङ्खचक्रे च पाशः कीलक एव च ।
मत्स्यः कूर्मो वराहश्च गरुडो नागबन्धकः ॥

Subject: Bharatalakṣaṇa.

Remarks—The Ms. is in good condition.

This as also the following Mss. are portions of various works relating to Bharataśāstra. The first verse is a quotation from Saṅgītaratnākara.

BHARATALAKṢAṆAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10679	B. L. 6649	P.	De.	Incomplete.
10680	„ 11521 b	Pl.	Gr.	„
10681	„ 11532 c	„	Te.	„
10682	Not noticed by Burnell Ms. 14175	„	Gr.	„
10683	Not noticed by Burnell Ms. 14176	„	„	„

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ अभिनयलक्षणम् ॥

10684. ABHINAYALAKṢAṆAM.

Burnell's Catalogue No. 11531. Page 61. Left column. Substance—Palm leaf. Size—$16\frac{7}{8} \times 1\frac{3}{4}$ inches. Leaves—54. Lines—7 to a Page. Script—Telugu. No. of Granthas—1650. Author—Śṛṅgāraśekhara. Incomplete. Not printed.

Beginning:

भकारो भावनैर्युक्तो रेफोरागेण मिश्रितः ।
तकारस्तालमित्याहुर्भरतार्थविचारणैः ॥

अनेटिदि ।

भकारं भावांशमयिवुण्डुनु । रकारं रागांशमयिवुण्डुनु ।
तकारं तालांशमयिवुण्डुनु । दीनिलो...... ।

End:

पार्श्वाक्रान्तो दक्षिणस्थो वामः सूच्ययदक्षिणः ।
अवक्रान्तावामपादस्वतिक्रान्तैः(?)कृतो यथा ॥
लीलतः सञ्चरेदुक्तं ललितं मदलं तदा ।
॥ अतीतम् ॥ यदि दशाकाशः...... ।

Colophon: (Leaf No, 38)

इति चतुर्थमभिनयक्रमं संपूर्णम् ।

Subject: Abhinayalakṣaṇa.

Remarks:—The Ms. is in a fairly good condition.

This is a comprehensive work on abhinaya by an unknown

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

author. But unfortunately the Ms. is incomplete and wants both beginning and end,

---

॥ अभिनयदर्पणः ॥

10685. ABHINAYADARPAṆAḤ.

Burnell's **Catalogue No.** 11516. Page 60. Right **column.** Substance—Paper. Size—$16\frac{1}{8} \times 1\frac{1}{4}$ **inches.** Leaves—85. Lines—6 to a Page. Script—Grantha. No of Granthas—1275. Author—? Incomplete. Printed.

Beginning:

असंयुतहस्तलक्षणम् ।

End:

विशेषमुनुगाचेप्पियुन्नादि ॥

Colophon:

यिक्लशिरोभेदलक्षणम् ।

Subject: Abhinayadarpaṇa with Telugu commentary.

Remarks: —The Ms. is in a fairly good condition.

A work of this name is edited by Dr. A. K. Kumaraswāmi and Duggirāla Gopālakrisṇa and printed at Cambridge in 1917. It is said to be by Nandikeśvara. But the author of this work is not known. This Ms. is also incomplete. The name of the commentator is not also known.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ABHINAYADARPAṆAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10686	B. L. 11519	Pl.	Gr.	Incomplete.
10687	„ 11521 a	„	„ & Tamil	„
10688	„ 11533	„	Gr.	„
10689 Not noticed by	Burnell Ms. 14177	„	„	„
10690	B. L. 11518	„	Te.	„
10691	„ 6651	P.	De.	„
10692	„ 11586 a	Pl.	Te.	„
10693	„ 11586 b	„	„	„
10694	„ 11524	„	„	„

॥ अभिनयादिविचारः ॥

10695. ABHINAYĀDIVICĀRAḤ.

Burnell's Catalogue No. 11523. Page 61. Left column. Substance—Palm leaf. Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches. Leaves—49. Lines—7 to a Page. Script—Telugu. No. of Granthas—1400. Author—? Incomplete. Not printed.

Beginning:

शिरोपास्तदृष्टमण्डलभेदानि ।

तन्निरूपितस्यायां पीनोन्नतपयोधरा ।

प्रगल्भा स्वरवृत्तिचे कुशलाग्रहमोक्षयोः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदिभरतप्रकारः ।

कथयामि ससन्देहे गीतशब्दस्वरूपकाः ।

आदिभरत उत्पत्त्यवादकारण अप्रकारव पार्वतीदेवी-

यरु परमेश्वरततोलगदसन्निदियदिन्दु करपुटेञ्जलियोगि... ।

End:

लघुभ्यां च गुरुश्चैव त्रिलघु प्लुतिरुच्यते ।

चतुर्लघुः काकपदं षडेते मात्रनिर्णयः ॥

अनुद्रुतं द्रुतश्चैव लघुर्गुरुराधिप्लुतम् ।

काकपादं तथा प्रोक्ता तालाङ्गुलि च षड्विधः ॥

अनुद्रुतं द्यङ्गुलिचद्रुतं तु चतुरङ्गुलम् ।

लघुरष्टाङ्गुलः प्रोक्ता गुरुस्तु षोडशाङ्गुलम् ॥

* *

Colophon: Nil.

Subject: Abhinayavicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ अभिनयलक्षणम् — आन्ध्रटीकासहितम् ॥

10696. ABHINAYALAKṢAṆAM—ĀNDHRAṬĪKĀSAHITAM.

Burnell's Catalogue No. 11530. Page 61. Right column.

Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—17 (22-38). Lines—5 to a Page. Script—Telugu. No.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Granthas—350. Author—? Incomplete. Not printed.

Beginning:

पायादायासखेदक्षुभितफणिफणारत्ननिर्यत्ननिर्य-

च्छायामायात्पतङ्गद्युतिमुदितवियद्वाहिनीचक्रवाकम् ।

अभ्रान्तभ्रान्तचूडातुहिनकरकरालीकनालीकनाभो

च्छेदायोधानुधावद्ग्रहणरथखणधूर्जटेस्ताण्डवं वः ॥

[धूर्जटेस्ताण्डवं वः]

पायादित्याशीर्वादम् । कीदृग्भूतमित्याह । आयासेति । आयासः खेदः आयासखेदेन क्षुभितः आयासखेदक्षुभितः फणा अस्य सन्तीति फणी । फणिनः । फणासुरत्नानि । आयासखेदक्षुभितफणिफणारत्नानि । रत्नेभ्यो निर्गतः यतो यस्मिन् कर्मणि तद्यथा भवति तथा निर्गतः ।

End:

सत्रिधास्यादग्रजश्च मुखजः पार्श्वजः क्रमात् ॥

वाङ्मुखः संमुखः पार्श्वमुख इत्यस्य लक्षणम् ।

इन्दुकुतात्पर्यं । अरालहस्तं योक * *

आलीढस्थानमन्दलि । पादचरणस्थानकमन्दु । दक्षिणचरण । श्रीमातृकलो आरु आकुलुकानं गान आदिविडिचिपेट्टि कोदव आकुलु व्रायिङ्चिनामु ॥

Subject: Abhinayalakṣaṇa with Telugu meaning.

Remarks:—The Ms. is in a fairly good condition.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The last words tell us that the original of which this is a copy wants 6 leaves which are left, and that the rest have been copied. This and the following Mss. under this name are completely dissimilar to each other.

॥ अभिनयलक्षणम् ॥

10697. ABHINAYALAKṢAṆAM.

Burnell's Catalogue No. 11543 a.

Substance—Palm leaf. Size—$19\frac{5}{8} \times 1\frac{1}{2}$ inches. Leaves—10 (26-35) Lines—6 to a Page. Script—Telugu. No. of Granthas—300. Author—? Incomplete. Not printed.

Beginning :

वितस्तिमात्रविस्पष्टौ स्थानकेन समांघ्रिणौ ।
स्थितौ चालितदाप्रोक्ता समपादेति सूरिभिः ॥

॥ इति समपादा ॥

स्थित्वादौ समपादेन कृत्वा......... ।
.... ॥

...यत्पादपार्श्वप्रतलसञ्चरं ।
तदादिगन्तरालत्वात् स्थितावर्तातदोदिता ॥
इति स्थितावर्ता ॥ २ ॥

End:

सघटोच्चलितः स्निग्धः शृङ्गारीकौतुकेतरः ।
मास्थामान्यविचारर्धिन् सिगुणग्रहणाग्रणीः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमान्नुवितरणेश्रय: ॥ रः कीर्तिकापश्च मेधावीधरणो-

न्वितः । नानाकलानुगु... ।

Colophon: (34)

इति पात्रगुणदोषाः

Subject Abhinayalakṣaṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ अभिनयलक्षणम् ॥

10698. ABHINAYALAKṢAṆAM.

Burnell's Catalogue No. 11542. Page 61. Left column. Substance—Palm leaf. Size—$9\frac{1}{2} \times 1\frac{1}{3}$ inches. Leaves—135. Lines—4 or 5 to a Page. Script—Telugu. No. of Granthas—1010. Author—? Incomplete. Not printed.

Beginning:

अपशकुनहस्रसं हन्ति वारादिदोषं

बहुकृतमपि विघ्नं नैव शङ्केऽन्तरङ्गे ।

सकलनिगमतत्वं मन्दिरं मङ्गलानां

स्मरतु मनसि यस्मिन् रामचन्द्रस्य मन्त्रम् ॥

रामो रक्षतु लक्ष्मणेन सहितो रामं न रामं भजे

रामो तिष्ठतु मानसं मम सदा रामाय तस्मै नमः ।

* *

श्रीरामचन्द्राय नमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिगिरिशविरिञ्चिवासवाग्नै-
रभिकृतपूजपुवक्रमाक्रियाणाम्(?) ।
प्रकृतसकलविघ्नमाम्बिकायाः
प्रथमसुतं प्रणमामि विघ्नराजम् ॥

॥ अर्थम् ॥ हरि श्रीहरिनि गिरिश परमेश्वरुणिण-

End:

ताण्डवानि पुरा रुद्रा षोडशानि न नृत्तना ।
एतेषु....नृतनामानि पद्मभूः ॥

यथा सूचीकरे नेता ब्राह्मणानाद्यकर्मणि ।
आदौ मध्ये तथाग्रे च ब्रह्मविष्णुशिवात्मनः ॥
द्वयं च शशिभानू च एतच्चैतन्यलक्षणम् ॥

Colophon: Nil.

Subject: Abhinayalakṣaṇa.

Remarks:—The Ms. is in good condition.

॥ अभिनयलक्षणादि ॥

10699. ABHINAYALAKṢAṆĀDI.

Not noticed by Burnell Ms. No. 14178.

Substance—Palm leaf. Size—$10\frac{7}{8} \times 1\frac{3}{8}$ inches. Leaves—42. Lines—3-6 to a Page. Script—Grantha & Telugu. No. of Granthas—250. Author—? Incomplete. Fragment only. Not printed.

Beginning:

सङ्गीतरत्नावल्यां ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरो वक्षः करौ पार्श्वं कटिश्चरण इत्यपि ।
षडङ्गानि भवन्त्येते कथितानि विपश्चितैः ॥

प्रत्यङ्गानि ॥

प्रत्यङ्गग्रीव...बाहुपृष्ठतथोदरम् ।
ऊरुजङ्घायुगश्चेति षडुक्तानि मनीषिभिः ॥

उपाङ्गानि भ्रुवौ नेत्रनासागण्डस्थलाधरम् ।
चीमश्चेति....षट्प्राहुरपरे मणिबन्धकौ ॥

शङ्करः ॥ ब्रह्मणो ब्रह्मतालश्च तत्तत्तालं प्रताडयेत् ।
मस्तके नयने पादे कराग्रे च हृदिद्वसु (?) ।
एवमङ्गानि सप्त स्युः.... .... ॥

Subject : Abhinayalakṣaṇādi.

Remarks :—The Ms. is in a fairly good condition.

The extracts appear to be portions of a work called Saṅgītaratnāvalī. It is not possible to ascertain the name of the author.

———

॥ नक्षत्राद्यभिनयलक्षणम् ॥

10700. NAKṢATRĀDYABHINAYALAKṢAṆAM.

Burnell's Catalogue No. 11520 c. Page 60. Right column. Substance—Palm leaf. Size—$11\frac{5}{8} \times 1\frac{1}{4}$ inches. Leaves—20 (1-20). Lines—7 to a Page. Script—Telugu. No. of Granthas—225. Author—? Incomplete. Not Printed.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Beginning:

नक्षत्रालक्कु अभिनयलक्षणम् ।

यि खलु हस्तद्वादशप्रमाणालु एलागण्डेण्टनु चेप्पबुन्नाडु
निर्दिनैकविधीनाञ्च ऋक्षहस्ताः प्रयोगतः ॥

॥ अर्थ ॥ नक्षत्रप्रकारमन्दु अभिनयिंचेटप्पुडु । सङ्के-
तालु कोन्नि अभिनयिंचवलेनु । नक्षत्रहस्तमनग । ❁ ❁

लोकेषु स्थावराणाञ्च जङ्गमानां तथैव च ।
नाम जन्मोक्तनक्षत्रहस्तैरर्थक्रिया भवेत् ।
एवं कार्यस्य चतुरः संमतिः पूर्वसंमतौ ।

End:

मतान्तरे ।

पताकत्रिपताकोर्ध्वपताकः कर्तरीमुखः ।
मयूरश्चार्धचन्द्रश्च पराशः शुकतुण्डकः ॥

मुष्टिश्च शिखराख्यश्च कपित्थकटकामुखः
सूच्याख्यः पद्मकोशश्च बाणसर्पशिरस्तथा ॥

मृगशीर्षः सिंहमुखं काङ्गूलः शालपद्मकः ।
चतुरो भ्रमरश्चैव हंसास्योहंस .... ॥

Subject: Nakṣatrābhinayalakṣaṇa with Telugu meaning.

Remarks:—The Ms is in good condition. The text of this differs from that of the following work.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ नक्षत्राभिनयलक्षणम् ॥

10701. NAKṢATRĀBHINAYALAKṢAṆAM.

Burnell's Catalogue No. 11597 a. Page 60. Right column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{5}{8}$ inches. Leaves—(3-9). Lines—5 to a Page. Script—Telugu. No. of Granthas—65. Author—? Incomplete. Not printed.

Beginning:

नक्षत्राभिनयः ।

नक्षत्रहस्तमनेदि ।

लोके च स्थावराणाञ्च जङ्गमानां तथैव च ।
नामजन्मोक्तनक्षत्रहस्तैरर्थक्रिया भवेत् ।
एवं काव्यस्य च गुरो समतिःपूर्वसंमिता ॥

लोकमुलोनु स्थावरजङ्गमरूपमुलैनट्टिवस्तुवुलु नाम-
नक्षत्र जन्मनक्षत्रालनेक्रानि अभिनयं पट्टलेरु । पूर्वमन्दु
शुक्रबृहस्पतुलमतं वल्लनु चेप्पबडुनु ।

End:

सूत्रम् । अ ॥ सूक्त । पादमेषं हस्तं ।
करोद्यजोमुकोदकथो मेषराशौ प्रयुज्यते ।
अनन्दि मेषराशिनि अमु ।

Subject: Nakṣatrābhinayalakṣaṇa with Telugu meaning.

Remarks:—The Ms. is in a fairly good condition.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ हस्तलक्षणम् ॥

10702. HASTALAKṢAṆAM.

Burnell's Catalogue No. 6653. Page 61. Left column.
Substance--Paper. Size—8½ × 4 inches. Sheets—19.
Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? **Complete. Not Printed.**

Beginning:

श्रीरामराम । श्री गणेशाय नमः ।

हस्तप्रकरणम् ।

पताकस्त्रिपताकश्चोर्ध्वपताकः कर्तरीमुखः ।
अरालमुष्टिः शिखरः कपित्थः कटकामुखः ॥

शुकतुण्डश्च काङ्गूलः पद्मकोशो लपल्लवः ।
सद्विमुखः सर्पशिराश्चतुरो मगशीर्षकः ॥

End:

सर्पशीर्षो हंसपक्षस्थानेऽस्मिन्नपरे जगुः ।
अपरेऽप्युपजग्मुस्तं स्वस्तिकेन विना कृतम् ॥

Colophon:

इति वर्धमान । त्रयोदशसंयुतहस्ताः ।

Subject: Hastalakṣaṇa.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given

वज्रिण्या मुद्रया शक्रं पद्मिन्या दर्शयेद्विधिम् ।
शङ्खिन्या केशवं रुद्रं शिरस्यञ्जलिमुद्रया ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

On the first page is given—

श्री बालगोपाल पाहि भक्तं मां विधेहि ।

लोलकुन्तलजाल लोकरक्षणशील गोपबाल ॥

यशोदावरतनय यतिजनाविधेय

वशकृतनिजमाय वल्लवीजनगेय ॥ पल्लवि ॥ १ ॥

हय्यंगवीनदधिचोर हरिसुतसहचार

गयिमानाविहार.................. ॥ २ ॥

वल्लवीकुण्डलीशालत्कृपा कुसुमशासनरूप

पाण्डवकुलदीप पट्टाभिरामभूप ॥ ३ ॥ पल्लवि

Obviously this and the following Mss. represent extracts from bigger works. It is not possible to trace them.

HASTALAKṢAṆAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10703	B. L. 6647	P.	De.	Incomplete.
10704	Not noticed by Burnell Ms. 14179 b	Pl.	Te.	„
10705	„ 6658	P.	De.	„
10706	Not noticed by Burnell Ms. 14180	„	„	„
10707	B. L. 6652	„	„	„

॥ नाट्यशिक्षारम्भः ॥

10708. NĀTYAŚIKṢĀRAMBHAḤ.

Burnell's Catalogue No. 1582. Page 61. Left column.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Substance—Palm leaf. Size—$17\frac{1}{4} \times \frac{7}{8}$ inches. Leaves—8. Lines—3 to a Page. Script—Telugu. No. of Granthas—75. Author—? Incomplete. Not printed.

Beginning:

नत्वा कृत्वा दोलहस्तौ स्थित्वा भुवि सरेखकम् ।
शिखरे वक्षसि करौ कृत्वा गारुडपूर्वकम् ॥

सव्यापसव्यतो हस्तौ पताकाख्यौ प्रसार्य च ।
भ्रान्त्वा सशिखरं पश्चादेकहस्तमुरू... ॥ २ ॥

End:

तदैव पश्चाद्वलना....................... ।
हस्तैकस्यासतो भेद कोऽप्यस्य परिकीर्तितः ॥

पुरतः पार्श्वतः पश्चादस्पृष्टधरणीतलम् ।
अन्तरिक्षे भ्रमणतो बहवः करणे विधाः ॥

Colophon:

इति करणानि ॥

इति पादशिक्षाविधिः ॥

Subject: Nāṭyasikṣārambha.

Remarks:—The Ms. is in a fairly good condition.

॥ नाट्यप्रशंसा ॥

10709. NĀTYAPRAŚAMSĀ.

Burnell's Catalogue No. 11517 d. Page 60. Right column.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Substance—Palm leaf. Size—16×1 inches. Leaves—6. Lines—5 to a Page. Script—Grantha. No. of Granthas—100. Author—? Complete. Not printed.

Beginning:

तं देवदारिकासङ्घैरूपलावण्यशालिभिः ।
महोत्सवे पर्वकाले दर्शयन्नर्तनं बुधः ॥

लक्ष्मीः ।

देवतासन्निधौ नाट्यं कर्तव्यमिति चाब्रवीः ।
अस्मिञ्छास्त्रे निगदितं नर्तनं तद्वद प्रभो ॥

नारायणः ॥

मतङ्गभरतेनोक्तं शास्त्रमेतन्प्रगेक्षणे ।
भावनारङ्गविस्तारतालोयत्र निगद्यते ॥

End

नानाविधान्नभक्ष्यैश्च पक्षमासर्तुवत्सरे ।
हावयेद्यागशालायामाज्यैरन्नैस्समिद्गणैः ॥

उत्सवान्कारयेत्तेन देवयागेन तर्पिताः ।
दिशन्ति देवा भूपानां सर्वाभीष्टफलं प्रिये ॥

इति नाठ्यप्रशंसा संपूर्णा ॥

Subject: Nāṭyapraśaṃśā.

Remarks:—The Ms. is in a fairly good condition.

It is not possible to trace from which bigger work this in an extract.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

NĀṬYAPRAŚAṂSĀ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10710	B. L. 11521 c	Pl.	Gr.	Complete.
10711	„ 11521 i	„	Te.	„
10712 Not noticed by Burnell	Ms. 14181 d	„	Gr.	„

॥ पूर्वरङ्गः ॥

10713. PŪRVARAṄGAḤ.

Burnell's Catalogue No. 11538 c. Page 61. Left column. Substance—Palm leaf. Size —17½ × 1¼ inches. Leaves—4. Lines—4 to a Page. Script—Telugu. No. of Granthas—200. Author—? Incomplete. Not printed.

Beginning:

विघ्नध्वान्त + विघ्नेश्वरः पातु नः ॥

या कुन्देन्दु + जाड्यापहा ॥

ब्रह्मा तालधरो हरिर्मुरलिभृद्वीणाधरा भारती

वंशज्ञा शशिभास्कराः.... सिद्धाप्सरः किन्नराः ।

नन्दिक्रौञ्चभिदौ मृदङ्गनिपुणौ सङ्गीतभस्तुम्बुरुः

शम्भुर्नाटयकरः सभामरगणः पायात्सभानायकम् ॥

विघ्नांशौ भारतीदेवी ब्रह्माविष्णुमहेश्वराः ।

CC-0. In Public Domain: Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

End:

एतल्लक्षणसंयुक्ता स्वरिणीति विदुर्बुधाः ।
अस्य नाट्यविशेषस्य महालक्ष्म्यादि देवताः ॥

....प्रेरिणे नाढ्यं पुंसामेव प्रशस्यते ।
स्त्रीणामपि प्रशस्तेति केचिदाहुर्मनीषिणः ॥

Colophon:

शुभमस्तु । गोपालार्पणमस्तु ।

Subject: Pūrvaraṅga.

Remarks:—The Ms. is in a decaying condition.

This is an abridgement of Pūrvaraṅga in Bhāratīya Nāṭyaśāstra.

॥ लास्यपुष्पाञ्जलिः ॥

10714. LĀSYAPUṢPAÑJALIḤ.

Burnell's Catalogue No. 14832 c.

Substance—Paper. Size—$7\frac{7}{8} \times 4\frac{7}{8}$ inches. Sheets—(19 & 20). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—? Complete. Not printed.

Beginning:

अथ लास्यपुष्पाञ्जलिर्लिख्यते ।

तत्रादौ प्रभुलक्षणम् ।
कुलीनश्च कलाभिज्ञस्तौर्यत्रिकविशेषवित् ।
सुन्दरस्तरुणः शूरो युद्धे दाने दयाविधौ ॥
इति प्रभुलक्षणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो नृत्तलक्षणम् ।

आनिबद्धो निबद्धश्च द्विधा गीतं प्रयुज्यते ।

आलापाद्यं निबद्धं स्याद्बद्धं तालपदादिभिः ॥

इति द्विविधगीतम् ॥

तत्र समपादलक्षणम् ।

प्रधानं सौष्ठवं पाददिगतालान्तरौ समौ ।

यत्र तत्समपादं स्याच्चतुराननदैवतम् ॥ १० ॥

Colophon:

इति समपादम् ।

Subject: Lāsyapuṣpāñjali.

Remarks:—The Ms. is in good condition.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ सङ्गीतचिन्तामणिः ॥

10715. SAṄGĪTACINTĀMAṆIḤ.

Burnell's Catalogue No. 11569 a. Page 61. Right column. Substance—Palm leaf. Size—19×1½ inches. Leaves—6 (1-6). Lines—5 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—? . Incomplete. Not Printed.

Beginning:

श्री कैलासमहाशैले पार्वतीसहितं शिवम् ।
स्थितं कल्पतरुच्छायामण्डले धृतकुण्डलम् ॥

ताण्डवाडम्बरं वीरं वीरभद्रार्चिताङ्घ्रिकम् ।
जटामण्डलविश्रान्तशीतगङ्गाजलावलिम् ॥

* *

पावनिः पार्वतीधीरो नारदश्चित्रसेनकः ।
चन्द्रसेनः कुमारोऽथ मेघसेनः शतक्रतुः ॥ ६ ॥

भरतो भद्रसिंहश्च दर्शैते नतकन्धराः ।
शङ्कराय नमस्कृत्य प्राङ्मुखायेदमब्रुवन् ॥ ७ ॥

स्वरशास्त्राणि सर्वाणि निर्मितानि त्वया विभो ।
अर्थशास्त्राणि सर्वाणि धर्मशास्त्राणि शङ्कर ।
...धिनाथेन निर्मितानि सुरेश्वर ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्यः शोकहरं शास्त्रं गानशास्त्रं महेश्वर ॥
तत्स्वरूपं समाचक्ष्व सारमुद्धृत्य शङ्कर ।

End:

निन्दिताश्च दरिद्राश्च व्याधियुक्ता न संशयः ।
सेयमादौ परस्ताच्च वाक्यं प्रणवनामकम् ॥
सर्वपापैर्दरिद्राच्च मुच्यते श्रवणात्सकृत् ।
[ते]ः प्रातस्समुत्थाय पठन् सर्ववेदफलं लभेत् ॥

Colophon:

इति श्री सङ्गीतचिन्तामणौ सामवेदरहस्ये प्रणवविवेको नाम प्रथमोऽध्यायः ॥

Subject: Saṅgītacintāmaṇi, First Adhyāya.

Remarks:—The Ms. is in a fairly good condition.

The work is written as if the Saṅgīta is taught by Śaṅkara to Parvatī, Nārada and others. The bibliography at the end of the Saṅgītaratnākara (Ānandāśrama edition) contains a work of this name by one Kamalalocana. It is not possible to say if this is a part of that. This Ms. contains the 1st chapter only.

॥ सङ्गीतदर्पणः ॥

10716. SAṄGĪTADARPAṆAḤ.

Burnell's Catalogue No. 6599. Page 60. Left column. Substance—Paper. Size—10⅜ × 4⅝ inches. Sheets—135. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—1500 Author—Caturadāmodara. Complete, Not printed.

Beginning :

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
सङ्गीतशास्त्रसंक्षेपः सारतोऽयं मयोच्यते ॥

भरतादिमतं सर्वमालोच्यातिप्रयत्नतः ।
श्रीमता हरिभक्तेन सज्जनानन्दहेतुना ॥

प्रचरद्रूपसङ्गीतसारोद्धारो विधीयते ।
गीतं वाद्यं नर्तनं च त्रयं सङ्गीतमुच्यते ॥

मार्गदेशी विभागेन सङ्गीतं द्विविधं मतम् ।
द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ॥

महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ।
तत्तद्देशगतया रीत्या यः स्याल्लोकानुरञ्जकम् ॥

End:

लास्याङ्गैरन्वितं यत्र नृत्यञ्च द्रुतमानश ।
स्वयं गायति वाद्यञ्च त्रिवलीं वादयेत्स्वयम् (?) ॥

तत्पात्रं गौण्डली केचिद्वादनं नीत्यमन्वते
त्रिवलीधारणं स्कन्दं ग्राम्यजं कुरुते स्त्रियः ।
अगायन्ती......त्वत्सान्मूकगौण्डली
गौण्डल्यामण्डनं प्रोक्तं तज्ज्ञैः कर्णाटदेशजम् ॥ ९१ ॥

Colophon:

इति गौण्डली ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति श्रीमत्पण्डितलक्ष्मीधरसुतचतुरदामोदरविरचिते सङ्गीतदर्पणे
नृत्याध्यायः सप्तमः समाप्तः ॥

Subject: Saṅgītadarpaṇa, 1—7 Adhyāyas.

Remarks:—The Ms. is in good condition. This author is also called Hari Bhaṭṭa as one of his introductory verses says and is the son of Lakṣmaṇārya. This work contains 7 Adhyāyas of which the first two only are up to now printed at Bombay in 1910 with a Guzerati translation and commentary by Ratansi-Līlādhara, Thakkur.

SAṄGĪTADARPAṆAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10717	B. L. 6619	P.	De.	Complete.
10718	„ 11499	Pl.	Te.	„
10719	„ 6621	P.	De.	Incomplete I—V
10720	„ 11500	Pl.	Te.	„
10721	„ 11501	„	„	„
10722	„ 11502	„	„	„ II
10723	„ 6820	P.	„	„ VI

॥ सङ्गीतमकरन्दः ॥

10724. SAṄGĪTAMAKARANDAḤ.

Burnell's Catalogue No. 6623. Page 60. Left column.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Substance—Paper. Size—$9\frac{3}{4} \times 5\frac{1}{2}$ inches. Sheets—75. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1380. Author—Veda. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ।

नत्वा गिरीशं गिरिजां गणेशं
षडाननं श्रीगुरुपादपङ्कजम् ।
मुखादिचालीविहितं विचारं
वेदाभिधस्तं विशदीकरोति ॥

युष्मत्कृतामुपकृतिं यदि न स्मरामो
रे दुर्जनाः सततदूषणदानरूपाम् ।
ग्रन्थे भवद्भयविचारितपूर्वरूपे
यास्यन्ति तत्कथमनन्तसुखं महान्तः ॥

मुखचालीगतं पाटं जकारादिकमुच्चरेत् ।
सजहांगने इति ॥

संहते शिखरौ हस्तौ कृत्वा खलु नयेत्पुरा ।
तत्र शीर्षं समं दृष्टिर्दृष्टा साद्भिरुदाहृता ॥ २ ॥

विष्णुर्मन्मथकीनाशसुरेन्द्राः कालसंज्ञकाः ।
महाकालः क्रमाद्ब्रह्मा बुधश्च रसदेवताः ॥

शृङ्गारे देवतामाहुरपरे मकरध्वजम् ।
इति रत्नाकरमते रसविवरणम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थेऽस्मिन् रुचिरे मय विरचिता या शृङ्खला निर्मिता
नृत्याध्यायविधौ तदादिगदिता पुष्पाञ्जलेः पद्धतिः ।
अन्ते रागरसस्वरूपकथनं यस्याख्यया निर्मितं
तस्यादौ वितता प्रभोः सुललिता वंशावली लिख्यते ॥

सौराष्ट्रे पुण्यदेशे नरपतिरभवत्कोऽपि विख्यातकीर्त्तिः
सोऽपि श्रीसूर्यवंशाभरणमणिरभूत्सोमनाथैकभक्तः ।

*   *

उमेति नाम्ना किल धर्मपत्नी
मल्लारिराजस्य सुतावसूत ।
षडाननः शाहमहीपनामा
परः शरब्जीति गजाननोऽसौ ॥

*   *

विततविमलकीर्त्तिर्मन्मथाकारमूर्तिः
परकरिहरिरूपः शाहनामा महीपः ॥

व्यरचि तदभिधानाद्ग्रन्थ एषो (?) विशेषा-
त्स जयति मकरन्दश्चारुसङ्गीतपूर्वः ॥

*   *

श्रीशाहभूपालसुतस्य गेहे
श्रीशम्भुनाम्नो निजगाद वेदः ।
सङ्गीतशास्त्रे गहने विधेयः
कोऽपि प्रकाराशुनटप्रतिज्ञाम् (?) ॥

तदादरादेव कृतो विशेषः
सतां मुदे श्रीमकरन्दभूपतेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोपालसंज्ञोऽखिलतालविज्ञः
तत्प्रत्ययानामपि तत्त्ववेत्ता ॥
संशिक्षयत्कण्हरमात्मपुत्रं

* *

सङ्गीतमकरन्दोऽयं मकरन्दमहीपतेः ।
श्रीशाहस्य प्रवीणस्य मुदे वेदेन निर्मितः ।

Colophon:

इति श्रीसङ्गीतमकरन्दे वेदकृतौ नृत्ताध्यायः समाप्तः ॥

शके १५७२ विकृतिनामसंवत्सरे भाद्रपदशुद्धषष्ठी ६ लिखितमिदं पुस्तकम् ॥

Subject: Saṅgītamakaranda.

Remarks:—The Ms. is in a decaying condition and is dated A. D. 1650.

A work of this name purporting to be by Nārada is published in the Gaekwad Oriental series as No. 16 in 1920. But this work has little in common with that. The author mentions the geneology of his patron and also some particulars.

(Maloji) — Mallaribhūpāla = Umā.

  Śāhaji — Sambhu

  Sarabhoji

Śāhaji was otherwise called Makarandabhūpa and the author says that he was teaching singing to his son Śambhu when he wrote this and named it after his patron. This family is said to belong to the Saurāṣṭra country or Guzerat.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This Śāhajī is no other than the father of the famous Śivājī, and Śambhāji the disciple of Veda is his elder brother. So this author should have flourished in the early part of the 17th century A. D.

SAṄGĪTAMAKARANDAḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
10725	B. L.	6641	P.	De.	Complete.
10726	,,	11511	Pl.	Te.	Incomplete.

DETAILED REMARKS on the ABOVE TABLE.

B. L. 10725

शके १५८२ परधाविनामसंवत्सरे श्रावणशुद्धनवमीबुधवासरे लिखितमिदम् ॥

गङ्गाधरखण्डेन लिखितम् ॥

The name of the scribe is one Gaṅgādharakhaṇḍe and the Ms. is dated A. D. 1660.

॥ सङ्गीतमुक्तावली ॥

10728. SAṄGĪTAMUKTĀVALĪ.

Burnell's Catalogue No. 11513. Page 60. Left column.

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—75.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Lines—5 to a Page. Script—Telugu. No. of Granthas—1600. Author—Devendra, Complete. Not printed.

Beginning:

वन्दे गङ्गाग्रशाङ्काञ्चितमणिमकुटं चन्द्रकान्त्योज्ज्वलाभं

दिव्यालङ्कारकान्तं नयनसुखकरं कान्तिसन्दोहगात्रम् ।

राकाचन्द्रास्यशोभं प्रणतशुभकरं सेवितं देवसङ्घै-

र्देवं कारुण्यसिन्धुं शिवमखिलजगन्नाथमिष्टार्थसिद्ध्यै ॥

रामादिसंश्रयो योऽर्थ्या नाटकादिषु कीर्तितः ।

नटेन दर्शितो रङ्गे भवेदथ यदश्रसः (?) ॥

आङ्गिको वाचिकस्तद्वदाहार्यः सात्त्विकोऽपि च ।

चतुर्धा त्वाङ्गिकोऽन्वर्थो नटेनाङ्गादिभिः कृतः ॥

End:

दृष्ट्वा शास्त्रमशेषमीश्वरशिवाब्रह्मेन्द्रनन्दीश्वरै

रम्भातुम्बुरुवायुनारदगणैर्विश्वावसुस्वातिभिः ।

शार्दूलाश्वतराञ्जनेयभरतैराद्यैर्मतङ्गादिभिः

प्रोक्तं तत्सकलं प्रयोगसुभगं शास्त्रं........

................विरचिता संगीतमुक्तावलिः ।

कण्ठस्था कुरुते प्रियः शुभगणे कान्तिं यशः शोभनं

दृष्टा चेतसि वृष्टिमुत्सवमयं सूते सुधासन्निभम् ।

हस्तस्थे विजयं ददाति सुतरां वैदग्ध्यदोग्ध्री...सा

सिद्धिं स...विसुसेविता ...कुरुते सर्वार्थदामिष्टदाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्गाशक्तिदशास्य दत्तिलयुतः श्रीकाश्यपो याष्टिकं
प्रोक्तं कंबलकोहलावपि मुनिः श्रीमातृगुप्तार्जुनौ ।
देवः क्षत्रसमाह्वयावपि च तौ राजा तथा राहलः
प्रोक्तः सोऽपि विशाखिलश्च मुनयः सङ्गीतविद्येश्वराः ॥
भोजराजो रुद्रसेनः प्राज्ञः सोमेश्वरोऽपि च
सङ्गीतविद्याकर्तारः कीर्तिताः सन्ति चापरे ।
व्याख्यातार इमे...शङ्कुकोद्भटलोलोल्लटाः
भट्टाभिनवगुप्ताश्च प्रोक्तः कीर्त्तिधरोऽपि च ॥
शंभुर्लोकपिता सदा सुरगणैरा...मै...द्वयो
गौरीसार्मकपतिसरिषद्गणैः सेविता (?) ॥

Colophon:

देवणाचार्यविरचिता सङ्गीतमुक्तावली समाप्ता ॥

Subject: Saṅgitamuktāvalī.

Remarks:—The Ms. is in a fairly good condition. The author mentions the name as Devendrācārya as also Devaṇṇācārya. He mentions a list of great authors on singing and Pravartakas among whom there are the names of Udbhaṭa, Lollaṭa, Abhinavagupta, Bhojarāja.

SAṄGĪTAMUKTĀVALĪ.

Descriptive No.	Collection No.	Substance.	Script	Remarks.
10728	B. L. 6646	P.	De.	Incomplete.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAṄGĪTAMUKTĀVALĪ (Contd).

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10729	B. L. 6655	P.	De.	Incomplete.
10730	„ 11514 a	Pl.	Te.	Fragment.

॥ संगीतरत्नाकरः ॥

10731. SAṄGĪTARATNĀKARAḤ.

Burnell's Catalogue No. 11496 Page 59. Right column. Substance—Palm leaf. Size—$12\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—211. Lines—3-8 to a Page. Script—Telugu. No. of Granthas—4000. Author—Śaraṅgadeva. Incomplete. Printed.

This work is published in the Ānandāśrama Sanskrit Series with Catura Kallinātha's commentary. From the introductory verses it can be gleaned that the family of this author first belonged to Kāshmir from where it came to the south. Soḍhala was his father and Bhāskara was his grandfather. He also says that he wrote this work at the bidding of a king called Siṅghaṇarāja a Yādava prince who ruled at Deogiri the modern Daulatabad. So the time of this author may be to be in the first half of the XIIIth century A. D.

It is reputed that this work has six commentaries of which only five are known to the public. These are by:—

1 Kallinātha
2 Siṃhabhūpāla
3 Kumbhakarṇanarendra

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

4 Gaṅgārāma

5 Haṃsabhūpāla.

The sixth is said to be by the author himself but is not traceable anywhere.

Of the above, the commentary of Siṃhabhūpāla on the 1st chapter only is published at Calcutta. The others except Kallinātha's do not seem to have been published. For further particulars, vide introduction to the work published in the Ānandāśrama Series. These edition contains at the end a bibliography of works on Saṅgīta published and not published, which is useful.

SAṄGĪTARATNĀKARAḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
17332	B. L. 11492	Pl.	Te.	Incomplete I—VI
10733	„ 11493	„	„	„
10734	„ 11495	„	„	„ Wants Beginning
10735	S. S. 58	„	Gr.	„ „ I
10736	„ 11494	„	„	„ „ II-VII
10737	„ 11589 b	„	„	„ „ VII
10738	„ 11539 a	„	„	„ „ „
10739	„ 11498 d	„	„	„ „ Fragment.
10740	„ 11497	„	„	„ „
10741	„ 11543 b	„	„	„ „
10742	„ 11544	„	„	„ „
10743	„ 11556	„	„	„ „

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

DETAILED REMARKS
on the
SAṄGĪTARATNĀKARA MSS.
IN THE ABOVE TABLE.

10736 At the end of the Ms. there is a verse by the scribe in Telugu. The name of the scribe is given as Kumāramaṅgalam Krisnappa.

राक्षसनामसंवत्सरं आश्विजमासं त्राशिनदि । श्रीकामाक्षीदेवी मां परिपालयतु ॥

॥ सङ्गीतरत्नाकरः—आन्ध्रटीकोपेतः ॥

10744. SAṄGĪTARATNĀKARAḤ—ĀNDHRAṬĪKOPETAḤ.

Burnell's Catalogue No. 11506. Page 59. Right column. Substance—Paper. Size—$17\frac{3}{8}\times1\frac{1}{4}$ inches. Sheets—178. Lines—3 or 4 to a Page. Script—Devanāgarī. No. of Granthas—1660. Author—Śārṅgadeva. Incomplete. Not printed.

Beginning:

.......…..स्वरगताध्यायं चेप्पि अंदु
पिंडोत्पत्तिप्र.... .... ॥

End:

....सगासासासा ।

इति मूडोकल । चतुर्थ्यां नालुगोकलयन्दु मध्यस्थाने मध्यसप्तकमन्दु...कुण्डु दैवताल प्रत्येकमै लघुकालं गलिगिनदि । निधौ । लघु । मु ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Colophon: Nil.

Subject: Saṅgītaratnākara with a Telugu commentary I—Adhyāya.

Remarks:—The Ms. is in a fairly good condition. But the first few leaves have completely gone. This and the following Mss. represent fragments of the work with a Telugu commentary by an unknown author.

SAṄGĪTARATNĀKARAḤ—ĀNDHRAṬIKOPETAḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
10745	B. L.	11507	Pl.	Te.	Incomplete
10746	„	11508	„	„	„
10747	„	11509	„	„	„
10748	S. S.	57	„	„	„

॥ सङ्गीतरत्नाकरव्याख्या—कलानिधिः ॥

10749. SAṄGĪTARATNĀKARAVYĀKHYĀ—KALĀNIDHIḤ.

Burnell's Catalogue No. 11503. Page 60. Left column. Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—(1-123; 174-272). Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—4650. Author—Caturakallinātha. Incomplete. Printed.

Subject: Saṅgītaratnākaravyākhyā I-VI Adhyāyas.

Remarks—The Ms. is in a fairly good condition.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This commentary along with the text is printed in the Ānandāśrama Sankrit Series, Poona. The author in the introductory verses gives his own descent and the geneology of his patron Immiḍideva.

I. Tuttāladeva of Śāṇḍilyagotrā belonging to Todaramalla family
|
Lakṣmīdhara = Narāyaṇī
|
Kallinātha

II. Vijaya of the first Vijayanagar or Saṅgama dynasty.
|
Prauḍhadevarāya (Devaraya II)
|
Immiḍidevarāya

This Immiḍidevarāya is no other than Mallikārjuna the son of Devarāya II who ruled for a very short time (Vide Sources of Vizianagar History P. 192). So this author should have flourished in the latter half of the 14th century.

SAṄGĪTARATNĀKARAVYĀKHYĀ—KALĀNIDHIḤ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.	
10750	B. L. 11505	Pl.	Te.	Incomplete	I
10751	„ 11504	„	„	„	III, IV, V and VII
10752	„ 6600	P.	De.	„	IV
10753	„ 6601	„	„	„	VI

॥ सङ्गीतरत्नाकरव्याख्या—सेतुः ॥

10754. SAṄGĪTARATNĀKARAVYĀKHYĀ—SETUḤ.

Burnell's Catalogue No. 6598 a. Page 59. Right column.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Substance—Paper. Size—13¾×7 inches. Sheets—102. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Gaṅgārama. Incomplete. First Adhyāya only. Not printed.

Beginning

॥ मूलम् ॥

जीयाद्राघवसुन्दरी कुलपतिर्या नादभूमीश्वरी
या सादिस्वरनूपुरारणितयुक्ता नोभूवालापकीः (?)।
ग्रामादित्रिकसप्तकावधिमयी मूर्छासमुच्छ्रायगा
सा श्रीचक्रमयीशितुः श्रुतिगुणीभूता विदेहात्मजा ॥ १ ॥
ईदृक् तद्दासवर्यः क्षितितलपतिभृन्नैव जातो न भावी
योऽयं विश्वाधिनाथः सरिगमपधनीलापसंलापनाढ्यः ।
श्रुत्योरेवं श्रुतीनां गणमणिलषितः सक्तधीर्ग्राममकूटे
जूटंतानेत्मकेऽसौ(?) स इह विजयते रागरूपो नृपेन्द्रः ॥ २ ॥

तदाज्ञयाहं करवाणि सेतुं
संगीतसिन्धोर्व्रजभाषयैव ।
तत्रासहायस्य सहायवन्तो
भवन्तु सन्तः प्रियदासवर्याः ॥ ३ ॥

सहन्तु तेऽतिसाहसं कुलादिचक्रकाननम् ।
उपस्थितं विमर्शनात्स्वरादिवादसङ्क्रमे ॥ ४ ॥
श्रीगुरुचरणसरोजे ध्यात्वा सेतूपरिस्थोऽपि ।
गङ्गारामितिसंज्ञः कुर्वे रामेशप्रीत्याहम् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माधुरकुलमणिजन्मा जिज्ञासूनां विनोदाय ।

तद्वत्सश्रीतद्गमतमनुकलयन्सुबोधाय ॥ ६ ॥

॥ मू ॥ ब्रह्मग्रन्थि० ॥

End:

सम्भाविता भूरिगुरुर्द्विकले वार्तिके पथि ।

चतुष्कले भूरिलघुर्दक्षिणे पृथुला मता ॥ ४ ॥

॥ इति गीतिप्रकरणम् ॥

Colophon:

इति श्रीमदनवद्यविद्याविनोदश्रीकरणाग्राधिपति श्रीसोढलदेवनन्दन-

निःशङ्कश्रीशार्ङ्गदेवविरचिते सङ्गीतरत्नाकरे स्वरगताध्यायः ।

॥ व्या ॥ इति गीतिप्रकरणम् ।

आज्ञापञ्जरसंस्थितो नरपतेश्चेष्टाजपंसूर्यकं(?)

धृत्वा हस्तियुगं विगाहनपरः सङ्गीतरत्नाकरे ।

संजह्रेस्वरयूथजातिश्रुतयः ग्रामोद्भवा मूर्छना(?)

स्थानानेकसमुद्भवों मणिचयाश्चादोस्वराध्यायके ॥ १ ॥

इति श्रीमहाराजाधिराजश्रीमहाराजाबहदुर सीतारामचन्द्रकृपापात्रा-

धिकारिविश्वनाथसिंहसुदेव तदाज्ञाप्रयुक्तश्रीमाधुरकुलमणितुला-

रामगर्भसमुद्भूतगङ्गारामकृतसङ्गीतसेतौ स्वहा(स्वरग)ताध्यायः

प्रथमः समाप्तिमगमत् । तदेतद्विदुषां शुभं भूयात् ॥

Subject: Saṅgītaratnākaravyākhyā-setu a Hindi commentary. I—Adhyāya.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Remarks:—The Ms. is in a fairly good condition. Alternate sheets are sulphurated.

Though the text of Sarṅgadeva is published, this commentary is not published. As this author says this work is written in Vrajabhāṣā or a North Indian Dialect. This commentary is called Saṅgītasetu and as the author says is written at the bidding of a prince called Viṣvanātha Siṃha Sudeva. He mentions his father's name as one Tulāram belonging to a family residing in Muttra. The Mss. in this library represents the commentary on all the Seven chapters.

SAṄGĪTARATNĀKARAVYĀKHYĀ—SETUḤ.

Descriptive No.	Collection No.		Substance.	Script	Remarks.
10755	B. L.	6609	P.	De.	Incomplete, I Adhyāya
10756	,,	6615	,,	,,	,,
10757	,,	6617	,,	,,	,,
10758	,,	6622	,,	,,	,,
10759	,,	6626 a	,,	,,	,,
10760	,,	6627 a	,,	,,	,,
10761	,,	6598 b	,,	,,	Incomplete, II Adhyāya
10762	,,	6603	,,	,,	,,
10763	,,	6610	,,	,,	,,
10764	,,	6598 c	,,	,,	,, III
10765	,,	6604	,,	,,	,,
10766	,,	6629 b	,,	,,	,,
10767	,,	6627	,,	,,	,,
10768	,,	6598 d	,,	,,	Incomplete, IV
10769	,,	6605	,,	,,	,,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SAṄGĪTARATNĀKARAVYĀKHYĀ—SETUḤ (Contd).

Descriptive No.	Collection No.		Substance.	Script.	Remarks.	
10770	B. L.	6611	P.	De.	Incomplete	IV
10771	,,	6626 e	,,	,,	,,	
10772	,,	6628	,,	,,	,,	
10773	,,	6598 c	,,	,,	,,	V
10774	,,	6612	,,	,,	,,	
10775	,,	6598 f	,,	,,	Incomplete,	VI
10776	,,	6606	,,	,,	,,	
10777	,,	6613	,,	,,	,,	
10778	,,	6598 g	,,	,,	,,	VII
10779	,,	6607	,,	,,	,,	
10780	,,	6608	,,	,,	,,	
10781	,,	6614	,,	,,	,,	
10782	,,	6627 c	,,	,,	,,	

॥ सङ्गीतराघवम् ॥

10783. SANGĪTARĀGHAVAM.

Burnell's Catalogue No. 6659. Page 51. Left column. Substance—Paper. Size—10×4¾ inches. Sheets—27. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Cinabommabhūpāla. Complete. Not printed.

Beginning :

श्रीगणेशाय नमः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाग्येनैव भगीरथादिव पुरा प्राचेतसादागता
या काण्डैरधिगत्य सप्तभिरिव स्रोतोभिरुर्वीतलम् ।
पुण्या पूरयति स्म भूमितनया भर्तुर्गुणाम्भोनिधिं
तां रामायणजाह्नवीमहरहर्धन्याश्चिरं गाहते ॥ १ ॥

आहारो मधुराधराधरसुधाधारैव यस्यादिमो
वाग्वृत्तिः प्रथमापि यस्य वनितासंलापलीलोत्सवः ।
प्रायः प्रस्खलितानि च प्रथमतो राधाकुचाधारवान्
यश्चक्रे चरणार्पणानि रचये तस्मै परस्मै नमः ॥ २ ॥

श्रोतव्यं मधुरं वचो यदि यदि स्मर्तव्यमाद्यं महः
सङ्गीतामृतमज्जनं यदि पुनः कर्तव्यमव्याहतम् ।
गीतं संसदि गीत[illegible]वमिदं धीरास्तदाकर्ण्यतां
साहित्यं नलबोम्मभूपजनुषः श्रीबोम्मभूमीपतेः ॥ ३ ॥

यं ब्रह्माणमिव स्वयं भगवती वव्रे गिरां देवता
ख्यातो यश्च रसज्ञया रघुवृषप्रागल्भ्यसारज्ञया ।
पुण्यश्लोकतमाय पूर्वकवये वल्मीकलब्धात्मने
तस्मै संप्रति साहितीपथमहापान्थाय बद्धोऽञ्जलिः ॥ ४ ॥

आसीदशेषजनतामहनीयशक्ति-
रासीमभूवलयविश्रुतपुण्यकीर्त्तिः ।
मार्तण्डवंशजनुषां मनुजाधिपाना-
मग्रेसरो जगति पङ्क्तिरथाभिधानः ॥ ५ ॥

ईजानो विविधैर्मखैरनुकलं राजा रघूणां पति-
र्भेजे कीर्त्तिमनुत्तमामुपचितां रेजे समेषूत्तमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रिं वाचामिह विस्तरेण बहुना कं वा न संप्राप्तवा-
नानन्दं सुतभाषितामृतझरीपानं तदेकं विना ॥ ६ ॥

अथ विदितसमस्तवेदितव्यो
विधिवदनुष्ठितवाजिमेधपूतः ।
रिपुबलविजयेन संभृतश्री-
रतनुत तन्तुकृते स सप्ततन्तुम् ॥ ७ ॥

अत्रान्तरे मखहविर्ग्रहणाय सर्वे
बर्हिर्मुखाः शतमखप्रमुखाः समेताः ।
ऊचुर्दशाननमहासमरप्रसिद्धा
दुग्धाब्धिशायिनमुपेत्य सरोरुहाक्षम् ॥ ८ ॥

॥ सौराष्ट्रः ॥ अट ॥

श्रीरमण पुराणपुरुष परुषेण ।
दारुणरभसतरेण शरेण ।
कारुणिक विभो न चिरेण ।

ध्रुवपदम् ॥

जहि जहि दशवदनं हे स्वामिन् ।
पश्य गुणे महितानस्य रणे विजितान् ॥
वश्यमवश्यमनन्त समस्तं
तस्य न चेद्वितनोषि निरस्तम् ॥ २ ॥

* *

बोम्मम्हीपतिना
कथितमिदं कृतिना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतु चिरं भुवि रुचिरविचित्रम् ।
मुरहरनामपदेन पवित्रम् ।

End:

यशसि शरीरिणि सञ्चरतीव च निजकुलधर्मसमुच्चये ।
शारदरजनीकरपाण्डुरवपुषि वृषे च कृतोदये ॥

समुदितमंगलकाहलिकारवमेदुरहर्म्यगृहोदरे ।
दिशि दिशि राजति राजपथे घनजालकुसुमविसराकरे ॥

* *

सकृदपि पठतामपि निशमयतामिह कलिकलुषभयापहम् ।
कृतिना बोम्ममहीपसुकृतिना कृतमिदमखिलसुखावहम् ॥

अथ रघुपतिर्यानं धेनूर्मणीर्मणिभूषणं
सदसि वितरन् प्राज्ये राज्याभिषेकमहोत्सवे ।
प्रकृतिसुभगैर्लोकं सर्वं गुणैरनुरञ्जय-
न लभत सतामाचन्द्रार्कं स्थिरां महतीं श्रियम् ॥

Colophon:

इति श्रीमत्पादजकुलकलशोदधिपूर्णसुधाकरस्य नलबोम्मभूपाल-तनूजस्य चिनबोम्मभूपालकस्य कृतौ सङ्गीतराघवाख्ये महाकाव्ये षष्ठः सर्गः । श्री रामार्पणमस्तु ।

Subject: Saṅgitarāghava 1—6 Sargas.

Remarks:—The Ms. is in a fairly good condition.

This is a work like Gītagovinda written by one Cinnābommabhūpāla son of Nalabommabhūpāla. The story of Rāmayāṇa is depicted. It is doubtful if this author is the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

same as Cinabomma the patron of the famous Appayadīkṣita.

SAṄGĪTARĀGHAVAM.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
10784	B. L. 11512	Pl.	Te.	Complete.

॥ सङ्गीतसमयसारः ॥

10785. SAṄGĪTASAMAYASĀRAḤ.

Burnell's Catalogue No 11545. Page 61. Left column. Substance—Palm leaf. Size—14⅓ × 1⅝ inches. Leaves—57 (16-72). Lines—4 or 5 to a Page. Script—Grantha. No. of Granthas—1000. Author—Pārśvadeva. Incomplete. Not printed.

Beginning:

यं यत्रगं श्रीपन्वभरितं............
विन्तुस्मरहदोल्लासं विवर्तनमतः परम् ।
स्मारसं ...क्रमादेषां लक्षणं प्रतिपाद्यते ॥

End:

कररन्ध्रोदरषष्ठि पायुरन्ध्रस्तु सप्तमी ।
